# ॥ दुर्गा सूक्तम् ॥

# DURGA SUKHTAM

# ॥ दुर्गा सूक्तम् ॥

जातवेदसे सुनवाम सोम मरातीयतो निदहाति वेदः ।
स नः पर्षदति दुर्गाणि विश्वा नावेव सिन्धुं दुरिताऽत्यग्निः ॥
तामग्निवर्णां तपसा ज्वलन्तीं वैरोचनीं कर्मफलेषु जुष्टाम् ।
दुर्गां देवीꣳ शरणमहं प्रपद्ये सुतर सितरसे नमः ॥
अग्ने त्वं पारया नव्यो अस्मान्थ्स्वस्ति भिरति दुर्गाणि विश्वा ।
पूश्च पृथ्वी बहुला न उर्वी भवा तोकाय तनयाय शंयोः ॥

विश्वानि नो दुर्गहा जातवेदः सिन्धु-न्ननावा दुरिताऽतिपर्षि ।
अग्ने अत्रिवन्मनसा गृणानोऽस्माकं बोध्यविता तनूनाम् ॥
पृतना जितꣳ सहमान-मुग्रमग्निꣳ हुवेम परमाथ्स-धस्थात् ।
स नः पर्षदति दुर्गाणि विश्वा क्षामद्देवो अति दुरिता-त्यग्निः ॥
प्रत्नोषि कमीड्यो अध्वरेषु सनाच्च होता नव्यश्च सथ्सि ।
स्वाञ्चाग्ने तनुवं पिप्रयस्वा स्मभ्यं च सौभगमाय-जस्व ॥
गोभिर्जुष्ट-मयुजो निषिक्तं तवेन्द्र विष्णो-रनुसंचरेम ।

नाकस्य पृष्ठमभि संवसानो वैष्णवीं लोक इह मादयन्ताम् ॥

ॐ कात्यायनाय विद्महे कन्यकुमारि धीमहि ।

तन्नो दुर्गिः प्रचोदयात् ॥ ॥

ॐ शान्ति श्शान्ति श्शान्तिः ।